## क्रतौ कुण्डपाय्यसञ्चाय्यौ । (१३०/२८९१)

कुण्डपाय्य सञ्चाय्य इत्येतौ शब्दौ निपात्येते क्रतावभिधेये । कुण्डशब्दे तृतीयान्त उपपदे पिबतेर्धातोरधिकरणे यत् प्रत्ययो निपात्यते युक् च । [1]कुण्डेन पीयतेऽस्मिन् सोमः इति कुण्डपाय्यः (ऋ. ८.१७.१३) [2]क्रतुः । 'यतोऽनावः' (६.१.२१३/३७०१) इति स्वरः । सम्पूर्वाच्चिनोतेः ण्यदायादेशौ निपात्येते । सञ्चीयते[3]ऽस्मिन् सोमः इति सञ्चाय्यः क्रतुः । क्रतौ इति किम् ? [4]कुण्डपानम् । सञ्चेयः ॥

## अग्नौ परिचाय्योपचाय्यसमूह्याः । (१३१/२८९२)

परिचाय्य उपचाय्य समूह्य इत्येते शब्दा निपात्यन्ते अग्नावभिधेये । [5]परिपूर्वात् उपपूर्वाच्च चिनोतेर्ण्य-दायादेशौ [6]निपात्येते । [7]परिचाय्यम् (तै. सं. ५.४.११) । उपचाय्यः (मै. ३.४.७) । सम्पूर्वाद् वहेः सम्प्र-सारणं दीर्घत्वं च [8]निपात्यते । 'समूह्यं चिन्वीत पशुकामः' (तै. सं. ५.४.११) । अग्नौ इति किम् ? [9]परिचेयम् । उपचेयम् । संवाह्यम् ॥

## चित्याग्निचित्ये च । (१३२/२८९३)

चित्यशब्दोऽग्निचित्याशब्दश्च निपात्येते । [10]चीयतेऽसौ चित्योऽग्निः । अग्निचयनमेव अग्निचित्या (शां. ब्रा. १९.१५.७) । भावे यकारप्रत्ययः तुक् च[11] । तेनान्तोदात्तत्वं भवति । अग्नावित्येव । चेयमन्यत् ॥

## ण्वुल्तृचौ । (१३३/२८९५)

धातोः इति वर्तते । सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः । कारकः । कर्ता । हारकः । हर्ता । चकारः [12]सामान्यग्रहणाविघातार्थः, 'तुश्छन्दसि' (५.३.५९/२००७), 'तुरिष्ठेमेयस्सु' (६.४.१५४/२००८) इति ॥

## नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । (१३४/२८९६)

आदिशब्दः प्रत्येकं [13]सम्बध्यते । त्रिभ्यो गणेभ्यः त्रयः प्रत्ययाः यथासङ्ख्यं भवन्ति । नन्द्यादिभ्यो ल्युः, ग्रहादिभ्यो णिनिः, पचादिभ्योऽच् । नन्दिग्रहिपचादयश्च न [14]धातुपाठतः सन्निविष्टा गृह्यन्ते, किं तर्हि, नन्दन रमण इत्येवमादिषु प्रातिपदिक[15]गणेषु अपोद्धृत्य प्रकृतयो निर्दिश्यन्ते ।

---

1. कुण्डैः अ. क. ड. फ. ह. 2. क्रतुः नास्ति अ. 3. अस्मिन् सोमः नास्ति ब, असौ अ. क. ड. 4. कुण्डपानां सञ्चेयः क. 5. पर्युपपूर्वात् ड. 6. निपात्यते नास्ति फ. 7. परिचाय्यः अग्निः ड. 8. निपात्यते नास्ति फ. 9. परिचेयः उपचेयः संवाह्यः ड. 10. चीयते असौ नास्ति अ. फ. 11. निपात्यते इत्यधिकम् अ. क. 12. सामान्यग्रहणार्थः क. फ, सामान्यग्रहणाविधानार्थः ब. 13. अभिसंबध्यते अ. फ. 14. धातुपाठसंनिविष्टाः क. 15. ग्रहणेषु फ.